# नारायण सूक्तम्  nārāyaṇa sūktam

ॐ धाता पुरस्ताद्यमुदाजहार ।

**om dhātā purastādyamudājahāra |**

शक्रः प्रविद्वान्प्रदिशश्चतस्रः ।

**śakraḥ pravidvānpradiśaścatasraḥ |**

तमेवं  विद्वानमृत इह भवति ।

**tamevaṁ  vidvānamṛta iha bhavati |**

नान्यः पन्था अयनाय विद्यते ।

**nānyaḥ panthā ayanāya vidyate |**

सहस्रशीर्षं देवं  विश्वाक्षं विश्वशम्भुवम् ।

**sahasraśīrṣaṁ devaṁ  viśvākṣaṁ viśvaśambhuvam|**

विश्वं नारायणं देवमक्षरं परमं पदम् ॥

**viśvaṁ nārāyaṇaṁ devamakṣaraṁ paramaṁ padam||**

विश्वतः परमान्नित्यं विश्वं नारायणगं हरिम् ।

**viśvataḥ paramānnityaṁ viśvaṁ nārāyaṇagṁ harim|**

विश्वमेवेदं पुरुष-स्तद्विश्व-मुपजीवति ॥

**viśvamevedaṁ puruṣa-stadviśva-mupajīvati||**

**पतिं विश्वस्यात्मेश्वरगं् शाश्वतगं् शिव-मच्युतम्।**

**patiṁ viśvasyātmeśvaragṁ śāśvatagṁ śiva-macyutam|**

**नारायणं महाज्ञेयं विश्वात्मानं परायणम्॥**

**nārāyaṇaṁ mahājñeyaṁ viśvātmānaṁ parāyaṇam||**

**नारायणपरोज्योति-रात्मा नारायणः परः।**

**nārāyaṇaparojyoti-rātmā nārāyaṇaḥ paraḥ|**

**नारायण परं ब्रह्म तत्त्वं नारायणः परः।**

**nārāyaṇa paraṁ brahma tattvaṁ nārāyaṇaḥ paraḥ|**

**नारायण-परो ध्याता ध्यानं नारायणः परः॥**

**nārāyaṇa-paro dhyātā dhyānaṁ nārāyaṇaḥ paraḥ||**

**यच्च किंचिज्जगत्सर्वं दृश्यते श्रूयतेऽपिवा।**

**yacca kiṁcijjagatsarvaṁ dṛśyate śrūyate'pivā|**

**अन्तर्बहिश्च तत्सर्वं व्याप्य नारायण-स्थितः॥**

**antarbahiśca tatsarvaṁ vyāpya nārāyaṇa-sthitaḥ||**

**अनन्तमव्ययं कविगं् समुद्रेऽन्तं विश्वशम्भुवम्।**

**anantamavyayaṁ kavigṁ samudre'ntaṁ viśvaśambhuvam|**

पद्मकोश-प्रतीकाशगं हृदयं चाप्यधोमुखम् ॥

padmakośa-pratīkāśagm̐ hṛdayaṁ cāpyadhomukham||

अधोनिष्ट्या वितस्त्यान्ते नाभ्यामुपरि तिष्ठति।

adhoniṣṭyā vitastyānte nābhyāmupari tiṣṭhati|

ज्वालमालाकुलं भाति विश्वस्यायतनं महत् ॥

jvālamālākulaṁ bhāti viśvasyāyatanaṁ mahat||

सन्ततगं शिलाभिस्तु लम्बत्याकोशसन्निभम्।

santatagm̐ śilābhistu lambatyākośasannibham|

तस्यान्ते सुषिरगं सूक्ष्मं तस्मिन् सर्वं प्रतिष्ठितम् ॥

tasyānte suṣiragm̐ sūkṣmaṁ tasmin sarvaṁ pratiṣṭhitam||

तस्य मध्ये महानग्नि-र्विश्वार्चि-र्विश्वतोमुखः।

tasya madhye mahānagni-rviśvārci-rviśvatomukhaḥ|

सोऽग्रभुग्विभजन्तिष्ठ-न्नाहारमजरः कविः ॥

so'grabhugvibhajantiṣṭha-nnāahāramajaraḥ kaviḥ||

तिर्यगूर्ध्व-मधश्शायी रश्मयस्तस्य सन्तता।

tiryagūrdhva-madhaśśāyī raśmayastasya santatā|

सन्तापयति स्वंदेहमापादतलमस्तकः ।

santāpayati svandehamāpādatalamastakaḥ|

तस्य मध्ये वह्निशिखा अणीयोर्ध्वा व्यवस्थितः ॥

tasya madhye vahniśikhā aṇīyordhvā vyavasthitaḥ||

नीलतो-यदमध्यस्था-द्विद्युल्लेखेव भास्वरा ।

nīlato-yadamadhyasthā-dvidyullekheva bhāsvarā|

नीवारशूकवत्तन्वी पीताभास्वत्यणूपमा ॥

nīvāraśūkavattanvī pītābhāsvatyaṇūpamā||

तस्याः शिखाया मध्ये परमात्मा व्यवस्थितः ।

tasyāḥ śikhāyā madhye paramātmā vyavasthitaḥ|

स ब्रह्म स शिवः स हरिः सेन्द्रः सोऽक्षरः परमः स्वराट् ॥

sa brahma sa śivaḥ sa hariḥ sendraḥ so'kṣaraḥ paramaḥ svarāṭ||

ऋतगं् सत्यं परं ब्रह्म पुरुषं कृष्णपिङ्गलम् ।

ṛtagṁ satyaṁ paraṁ brahma puruṣaṁ kṛṣṇapiṅgalam|

ऊर्ध्वरेतं विरूपाक्षं विश्वरूपाय वै नमो नमः ॥

ūrdhvaretaṁ virūpākṣaṁ viśvarūpāya vai namo namaḥ||

**ॐ नारायणाय विद्महे वासुदेवाय धीमहि ।**

**om nārāyaṇāya vidmahe vāsudevāya dhīmahi|**

**तन्नो विष्णुः प्रचोदयात् ॥**

**tanno viṣṇuḥ pracodayāt||**

**ॐ शान्तिः शान्तिः शान्तिः ॥**

**om śāntiḥ śāntiḥ śāntiḥ||**

---